## ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् । (५/२२९९)

[1]हकारान्तानां मकारान्तानां [2]यकारान्तानामङ्गानाम्, क्षण [3]श्वस जागृ णि श्वि इत्येतेषाम्, एदितां च इडादौ सिचि [4]परस्मैपदे परतो वृद्धिर्न भवति । ग्रह – अग्रहीत् । स्यम – अस्यमीत् । [5]व्यय – अव्ययीत् । टुवम – अवमीत् । क्षण – अक्षणीत् । श्वस – अश्वसीत् । जागृ – अजागरीत् । णि – औनयीत् । ऐलयीत् । श्वि – अश्वयीत् । एदिताम् – रगे – अरगीत्[6] । कखे – अकखीत् । ह्म्यन्तक्षणश्वसामेदितां च 'अतो हलादेर्लघोः' (७.२.७/२२८४) इति [7]विकल्पे प्राप्ते प्रतिषेधः । जागृणिश्वीनां तु सिचि वृद्धिः [8]प्राप्ता, सा च 'नेटि' (७.२.४/२२६८) इति न प्रतिषिध्यते । न च अन्तरङ्गत्वादत्र पूर्वं गुणो भवति, सिचि वृद्धेरनवकाशत्वात् । यदि[9] पूर्वं गुणः [10]स्यादिह णिश्विग्रहणमनर्थकं स्यात्, गुणायादेशयोः कृतयोः यकारन्तत्वादेव [11]प्रतिषेधस्य सिद्धत्वात् । तस्मादिदमेव श्विग्रहणं ज्ञापकम् न[12] सिच्यन्तरङ्गमस्ति [13]इति । अथ जागृग्रहणं किमर्थम्, [14]'जाग्रोऽविचिण्णल्ङित्सु' (७.३.८५/२४८०) इति जागर्तेर्गुणो वृद्धेरपवादो विधीयते, स यथा 'अचो ञ्णिति' (६.२.११५/२५४) इति वृद्धिं बाधते तथा सिचि वृद्धिमपि बाधिष्यते ? नैतदस्ति । [15]कृते गुणे 'अतो ल्रान्तस्य' (७.२.२/२३३०) इति या वृद्धिः प्राप्नोति सा प्रतिषिध्यते । अथ गुणविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्बाध्यते, यथा जागरयति इत्यत्र 'अत उपधायाः' (७.१.११३/२२८२) इत्यपि वृद्धिर्न भवति, तथा चिण्णलोः प्रतिषेधोऽर्थवान् भवति इति शक्यमिह जागृग्रहणमकर्तुम् ? तत्तु क्रियते विस्पष्टार्थम् ॥

## ऊर्णोतेर्विभाषा । (६/२४४९)

ऊर्णोते[16]रिडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्न भवति । प्रौर्णवीत्, प्रौर्णावीत् । 'विभाषोर्णोः' (१.२.३/२४४७) इति [17]अङित्त्वपक्षे [18]वृद्धिविकल्पोऽयम् । ङित्त्वपक्षे तु [19]गुणवृद्ध्योरभावे उवङ् भवति । प्रौर्णुवीत् ॥

## अतो हलादेर्लघोः । (७/२२८४)

[20]हलादेरङ्गस्य लघोरकारस्य [21]इडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्न भवति । अकणीत्, अकाणीत् । अरणीत्, अराणीत् । अतः इति किम् ? अदेवीत् । असेवीत् । न्यकुटीत्, न्यपुटीत् [22]इत्यत्र अतः इत्यस्मिन्नसति स्थानिनिर्देशार्थमचः इत्येतद[23]नुवर्तयितव्यम् । तत्र अज्लक्षणा वृद्धिरिग्लक्षणा न भवति इति[24] 'क्ङिति च' (७.२.११८/१०७६) इति प्रतिषेधो न [25]स्यात् । हलादेरिति किम् ? मा भवानशीत् । मा भवानटीत् । लघोः इति किम् ? अतक्षीत् । अरक्षीत् । अथेह कस्मान्न भवति अचकासीत् इति ? येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् इति हला व्यवधानमाश्रितम्, न पुनरचापि व्यवधानम् इति वृद्धिर्न भवति । अथ पुनरेकेन [26]वर्णेन व्यवधानमाश्रीयते न पुनरनेकेन इति कल्पने शक्यमकर्तुं लघोः इति, अतक्षीत् इत्यत्रानेकेन व्यवधानम् [27]इति न भविष्यति ? तत् क्रियते विस्पष्टार्थम् । इटि इत्येव, अपाक्षीत् ॥

---

1. नेटि इति वर्तते क. 2. यकारान्तानां च ब. 3. श्वसि क. 4. परस्मैपदपरे क. ब. ड. इ. 5. यकारान्तानां क. 6. लगै अलगीत् इत्यधिकम् क. ड. 7. विकल्पप्रतिषेधार्थम् नित्यम् वचनम् क. ई. ह. 8. प्राप्नोति इ. 9. च इत्यधिकम् ब. 10. स्यादत्र ई. 11. वृद्धि इत्यधिकम् क. ड. इ. 12. हि इत्यधिकम् क. 13. इति नास्ति ब. 14. यावता इत्यधिकम् क. ड. इ. 15. गुणे रपरत्वे च कृते क. 16. अङ्गस्य परे इत्यधिकम् क. 17. यदा न ङित्त्वं तदा क. 18. विकल्पोऽयम् इ. 19. उभयोरपि इत्यधिकम् क. 20. नेटि इति वर्तते विभाषा इति च इत्याधिकम् क. 21. स्थाने इत्यधिकम् क. 22. अत्र क. 23. अनुवर्तनीयम् इ. 24. कुटादित्वात् ङित्वे इत्यधिकम क. 25. तस्मादत इत्येवं कर्तव्यम् इत्यधिकम् क. 26. वर्णेन नास्ति क. 27. अस्ति इत्यधिकम् क.